भीमरावाम्बेडकरचरिताश्रितकाव्यानामध्ययनम्

संस्कृतविषयेविद्यावारिध्युपाध्यार्थं प्रस्तुतशोधप्रबन्धस्य

प्रस्तावितरूपरेखा

निर्देशिका **शोधार्थिनी**

डॉ. निशीथगौड. **कृतिः यादवः**
सहायकाचार्या
संस्कृतविभागः कलासंकायः

संस्कृतविभागः, कलासंकायः

दयालबाग एजुकेशनल इन्स्टीट्यूट (डीम्ड यूनिवर्सिटी)

दयालबाग, आगरा - 282005

2022

परिचयः

संस्कृतभाषैवञ्च संस्कृतसाहित्यस्य नाम श्रुत्वैव सामान्यतया जनानां मनसि प्राचीनसंस्कृतसाहित्यस्यैव विचारः भवति, यथा वर्तमानसमये न तु संस्कृते किमपि सर्जनं भवत्येवञ्च तस्याः भाषायाः काऽपि प्रासङ्गिकताऽस्ति। अहं चिन्तयामि यत् कस्य दोषोस्ति अत्र ? अत्यधिकचिन्तनं कृत्वैव ज्ञानं भवति यत् अस्याः वार्तायाः प्रसारणस्य प्रयत्नमेव न कृतम्, यत् संस्कृतभाषैका जीविता भाषैवञ्च समृद्धभाषास्ति। तस्यां भाषायामपि काव्य-सर्जनस्य निरन्तरधारा प्रवहत्यद्यापि, शताधिकखण्डकाव्यमहाकाव्यानि चाधुनिकयुगे संस्कृतेनेव रचितानि एवञ्चाग्रे अपि रचना भवति, आवश्यकतास्ति चेत् केवलं तत् सर्वं प्रकाशं प्रति नयनस्यैव। प्रस्तुतशोधप्रबन्धे अस्याः भावनायाः परिणत्यस्ति। मम विश्वासोस्ति यत् एषः प्रयासः सुरभारत्याः प्रचारप्रसारस्य सहयोगेन सहैव तस्य साहित्यस्य सामाजिकचेतनायाः युगीबोधं प्रकाशितं कृत्वा संस्कृतस्य प्रासङ्गिकतायाः सम्बन्धे प्रसरितभ्रान्तेः निर्मूलं करिष्यति। संस्कृतकवीनां दृष्टिः सर्वदैव स्वस्य परिवेशमेवञ्च वर्तमानसमाजं प्रति सजगा भवति। एतदेव कारणमस्ति। यत् केवलमत्र राम-कृष्ण-शिवादीनां कथाधारितं काव्यं न लिखितम्, अपितु समयस्य गतिं दृष्ट्वार्वाचीनसाहित्यस्य प्रसिद्धकवि-घटनादिं स्वीकृत्यापि संस्कृतलेखकाः लेखनं कृतवन्तः। ऋषि-राष्ट्रभक्त-राजनेता-समाजसेवकाः च एतानपि काव्यस्य नायकः इति विचिन्त्य काव्यं रचयन्तः भवन्ति। कविभिः महतोद्देश्यपूर्त्याः कृते स्वस्य पार्श्वे हि महच्चरितस्य अन्वेषणं प्रारब्धम्। **"भीमरावाम्बेडकरचरिताश्रितकाव्यानामध्ययनम् "** इति विषयोऽपि अस्यां प्रक्रियायां महती उपलब्धिः भविष्यति।

एषः प्रसन्नतायाः विषयोस्ति, यत् विद्वांसः स्वस्य ध्यानमाधुनिकसंस्कृतं प्रति नीतवन्तः।

संस्कृत साहित्यस्य परम्परायाः अनुसारेण काव्यं द्विविधं भवति। श्रव्यकाव्यंदृश्यकाव्यञ्च। महाकाव्यं खण्डकाव्यञ्च दृश्यकाव्यस्यान्तर्गते प्रबन्धकाव्यमस्ति। किमपि काव्यं स्वसंज्ञातः एव सम्पृक्तं न भवति।

महाकाव्यस्य महत्तस्वरूपजन्येन सह गुणजन्यमप्यस्ति।

शास्त्रीयदृष्ट्या महाकाव्यं भूत्वाऽपि विशिष्टलक्षणैः आबद्धमावश्यकमस्ति। यद्यपि रामायणमहाभारतयोः महाकाव्यविषयस्य मान्यता स्थिरा अभवत्, तथाऽपि सर्वप्रथमं महाकाव्यस्य शास्त्रीयस्वरूपस्य वर्णनं भामहकविवरस्यैव स्वीकृतं भवति। दण्डी-रूद्रट-हेमचन्द्र-विश्वनाथश्च सर्वेऽपि तस्यैव अनुकरणं कृतवन्तः। अस्मिन् ऐतिहासिकस्य अथवा पौराणिकपुरूषस्य सम्पूर्णजीवनकथायाः आद्योपांतस्य वर्णनं भवति। महाकाव्ये एते नियमाः आवश्यकाः भवन्ति।

- महाकाव्यस्य नायकः ऐतिहासिकः अथवा पौराणिकः तथाच धीरोदात्तः भवेत्।
- नायकस्य जीवनस्य सम्पूर्णकथायाः सविस्तारवर्णनं भवेत्।
- श्रृंगार-वीरशांतरसेभ्यः एकरसस्य प्रधानतया एवञ्च यथा स्थाने अन्यरसाणामपि प्रयोगः करणीयः।
- काव्ये अष्ट अथवा अष्टतः अधिकसर्गाः भवेयुः। प्रत्येकसर्गस्य अन्ते छन्दपरिवर्तनं तथाच सर्गस्य अन्ते अग्रिमांकस्य सूचना भवेत्।

सर्गबन्धो महाकाव्यं महतां च महच्चयत्।
अग्राभ्याशब्दमर्थ्यश्च सालङ्कारं सदाश्रयम्।।
मन्त्रदूतप्रयाणाजिनायकाभ्युदयैश्चयत्।
पञ्चभिर्सन्धिभिर्युक्तं नातिव्याख्येवमृद्धिमत्।।
चतुर्वर्गाभिधानेऽपि भुयसार्थोपदेशकृत्।
युक्तं लोकसवभावेन रसैश्च सकलैः पृथक्।।
नायकः प्रागुपन्यस्य वंशवीर्यश्रुतादिभिः।
न तस्यैव वधं ब्रूयादन्योत्कर्षभिधित्सया।।

भामह, काव्यालङ्कार,१/१९-२२

महाकाव्यं संस्कृतसाहित्यस्य सा एव महत्त्वपूर्णविधास्ति, यस्यां मानवजीवनस्य सर्वांगीणगतिविधीनां विवरणं विद्यमानं भवति। महाकाव्येषु महापुरुषाणामुत्कृष्टघटनानां चित्रणेन कविः समाजस्य पथप्रदर्शनं करोति।

आधुनिकमहाकाव्यम्

स्वस्य पूर्ववर्त्तिशास्त्र्याचार्याणां अनुकरणं कृत्वा **" डॉ. रहसबिहारी द्विवेदि"** महोदयेन आधुनिकमहाकाव्यस्य लक्षणानि दत्तानि सन्ति।

यथा –

सर्गैर्वृत्तैश्च बद्धं सहृदयहृदयाह्लादिशब्दार्थ रम्यं
संवादैश्योच्चशिल्पैः सततरसमयं ग्रन्थिमुक्तं समृद्धम् ।
पात्रं स्याद् यस्य मुख्यं परम् गुणयुतं लोकविख्यातवृत्तम् ।
भव्यं लोकस्वभावं महदपि महतां तन्महाकाव्यमास्ते ।।

दूर्वा-द्वितीयोन्मेष,अप्रैल-मई-जून(२००५),पृ.९३

अर्थात् महाकाव्यसर्गबद्धमेश्च अस्य विषयः गभीरः भवति। अस्यारम्भे आशीर्वाद-नमस्कार-वस्तु-निर्देशश्च भवति, तथाच अस्य नायकः महाधीरोदात्तादीनां गुणेन युक्तः भवति। अस्मिन् चतुर्वर्गफलप्रस्त्याः प्रतिपादनमेवञ्च सर्वेषां रसानां पृथक् - पृथक् निरूपणं भवेत्।

महाकाव्ये नगर-अर्णव-शैल-चन्द्र-सूर्योदय-उद्यान-उत्सव-ऋतु-क्रीडा-विवाह-विजय-मन्त्र-दूत-प्रयाणादीनां वर्णनमपेक्षितं भवति। सर्गाधिकविस्तृतः नास्ति चेत् कथावस्तु पञ्चनाट्यसन्धिभ्यः युक्तं भवेत्।

खण्डकाव्यं साहित्ये प्रबन्धकाव्यस्येकरूपमस्ति, जीवनस्य कामपि विशेषघटनां स्वीकृत्य खण्डकाव्यं लिखितं भवति। **'खण्डकाव्यम्'** इत्यनेन शब्देन स्पष्टं भवति, यत् अस्मिन् काव्ये मानवजीवनस्य एकविशेषघटनायाः प्रधानता भवति। यस्मिन् चरितनायकस्य सम्पूर्णजीवनं कविं प्रभावितमपि न करोति। कविः चरितनायकस्य जीवनस्य कयाचित् सर्वोत्कृष्टघटनया प्रभावितः भूत्वा चरितनायकस्य जीवनस्य खण्डविशेषस्य स्वकाव्ये पूर्णतया उद्घाटनं करोति। खण्डकाव्यस्य कथासूत्रे जीवनस्यानेकरूपता भवति, अतः एव अस्य कथानकं कथायाः प्रकारेण शीघ्रतयान्तपर्यन्तं गच्छति।

संस्कृतसाहित्ये खण्डकाव्यस्य परिभाषा साहित्यदर्पणे उपलभ्यते।

भाषा विभाषा नियमात् काव्यं सर्गसमुत्थितम्
एकार्थप्रवणैः पद्यैः संधि-साग्रयवर्जितम्।
खण्डकाव्यं भवेत् काव्यस्यैकदेशानुसारि च।

साहित्यदर्पण ६/३२१

अस्याः परिभाषायाः अनुसारेण कस्याश्चित् भाषायाः अथवा उपभाषायाः सर्गबद्धेवश्च एककथायाः एतादृशनिरूपकपद्यात्मकग्रन्थः, यस्मिन् सर्वसन्धयः न भवन्ति। तत् खण्डकाव्यं भवति।

आधुनिकखण्डकाव्यम्

अभिराजराजेन्द्रमिश्रकविवरेण स्वस्य आधुनिकग्रन्थे अभिराजयशोभूषणे खण्डकाव्यस्य लक्षणमुक्तमस्ति, यत् कस्यचित् पूरूरषार्थस्य आंशिकवर्णनं भवति। अथवा नायकस्य जीवनस्य यत् खण्डवर्णनं भवति, तत् खण्डकाव्यं भवति।

कस्यचित्पुरुषार्थस्य वर्णनन्तु यदांशिकम्।
जीवनस्याथवा नेतुः खण्डकाव्यं तदुच्यते।।
खण्डकाव्यमिदञ्चैव स्वेतिवृत्तानुरोधतः।
विविधान्यभिधानानि पृथगर्थानि।।

अभिराज. ८१,८२

अर्थात् खण्डकाव्यं स्व इतिवृतस्य अनुरोधवशकरणेन पृथगर्थयुक्तनाम धारणं करोति।

भीमरावाम्बेडकरचरिताश्रितकाव्यानि

भीमरावाम्बेडकरः आधुनिकभारतस्यासाधारणविद्वान् विधिवेत्ता समाजसुधारकः लेखकः शिक्षाविद्-राजनेता अर्थशास्त्री तथा च उत्कृष्टवक्ता आसीत्। राष्ट्रियजीवनस्य एतेषु सर्वक्षेत्रेषु तस्य योगदानमविस्मरणीयमस्ति। भीमरावाम्बेडकरस्य जीवनवृत्तं महासागरोऽस्ति, अस्मिन् अनेकग्रन्थाः लिखिताः तथा च शोधकार्याण्यपि कृतानि सन्ति, तथा च संस्कृतेन मया काव्यानि प्राप्तानि सन्ति। तेषु उत्कृष्टमहाकाव्यद्वयमेवञ्चेकं खण्डकाव्यमुल्लिखितमस्ति।

१.अम्बेडकरदर्शनम्

अम्बेडकरदर्शनं महाकाव्यमस्ति, अस्मिन् काव्ये **प्रो. बलदेवसिंहमेहराकविवरेण** सुललितसरण्या भाव-शालिन्या सुसरलभाषया **भारतरत्नभीमरावाम्बेडकर-महाभागस्य पुण्यचरितं** वर्णितमस्ति। **सप्तदशसर्गात्मकेऽस्मिन्** काव्ये डॉ.भीमरावाम्बेडकरस्य जीवनचरिते मानवीयप्रतीकरूपेण तथा च संविधानस्राष्टरूपेणे सह तस्य जीवनस्य प्रत्येकांशमपि सुसरलतया प्रकाशितमस्ति। यथा सः अधिकाराय संघर्षं कुर्वन् कथं शोषितनारीभ्यः उद्बोधनं दत्तवान्।

हीनभावं परित्यज्य वीरप्रसविनी स्त्रियः।
वसंत किल संसारे एषो धर्मः सनातनः ।।

अ.द. ५/३०

भीमरावः दलितजनेषूत्साहस्य सञ्चारं कृत्वा जीवनस्य सार्थकतां सिद्धं कुर्वन् **सप्तविंशत्यधिकनवदशशतके वर्षे सितम्बरमासस्य एकादशदिनाङ्के** दामोदरभवने मुम्बई-नगरे एव दलितसभायां सम्बोधयन् उक्तवान् , यत्

सहस्रवर्षपर्यन्तं काकसन्निभजीवनम्।
नास्ति लोके समीचीनमिदं जीवनलक्षणम्।।

अ.द.५/१५

२. भीमायनम्

भीमायनमपि एकमुत्कृष्टमहाकाव्यमस्ति। एतत् महाकाव्यं **प्रो. प्रभाकरशंकरजोशी** कविवरेण विरचितमस्ति। अस्य महाकाव्यस्येकविंशतिस्सर्गेषु भीमरावाम्बेडकरस्य सम्पूर्णचरितस्य वर्णनमुत्तमतया कृतमस्ति। भीमरावाम्बेडकरः भारतीयसंविधानस्य केवलं शिल्पकारः न आसीत्, सः तु आधुनिकभारतस्यनिर्माणकर्ता अप्यासीत्। तेनेव भारतीयसमाजस्यनिर्भिकविश्लेषण-सामाजिककुरीतीनामुद्घाटन-दलितानामुद्धार-संविधानस्य रचना-सामाजिकलोकतंत्रस्याख्यनं तथाच सहजमानवरूपेण मानवगौरवस्य जयगानं कृतम्। अस्य दर्शनमं वयं भीमायनमहाकाव्ये सम्यक्तया कुर्तुं शक्नुमः। अस्यां श्रृंखलायामेव अम्बेडकरेण बारं-बारम् असमानता देशात् बहिः

कृत्वा समानता स्थापनाय बलं दत्तम्। तस्मात् सर्वेऽपि असमानतां विस्मृत्य एकराष्ट्रप्रेमी भूत्वा वासं कुर्युः। अनेन भारतदेशे एकता बलं प्राप्नुयात्। अतः **प्रो. प्रभाकरशंकरजोशीकविवरेण** स्व-महाकाव्ये राष्ट्रियसमानतायै अम्बेडकरस्य संघर्षस्य प्रतिपादनं कृतम्। तस्मिन् अम्बेडकर वदति यत्

सर्वै जनाः संततिरीश्वरस्य चिच्छक्तिरस्मास्वपिभात्यपूर्वा।
निर्माय उच्चावचतां समाजे जनैः सवर्णैस्तु बहिष्कृताः स्मः।।

भीम.११/१५

वयं सर्वेऽपि एकस्य ईश्वरस्य सुपुत्राः स्मः। यद्यपि अस्मासु चिदरूपणी शक्तिः विद्यमाना अस्ति, तथाऽपि सुवर्णैः निर्मितनियमानां भेदभावकारणात् समाजे बहिष्कृताः स्मः।

३.भीमाम्बेडकरशतकम्

भीमाम्बेडकरशतकमिति खण्डकाव्यमस्ति, काव्येऽस्मिन् वयं दृष्टुं शक्नुमः, यत् आधुनिकभारते बौद्धधर्मस्य पुनर्जागरणे भीमरावाम्बेडकरस्य योगदानं विस्मृतं न भवितुमर्हति, इत्येव **डॉ. प्रियसेनसिंहकविवरेण बहु सम्यक्तया** प्रकाशितमस्ति। अद्य भारते यावदपि बौद्धानुयायिनः सन्ति, तेषां वर्गद्वयोः विभाजनं कर्तुं शक्यते। प्रथमे वर्गे तु तिब्बतीबौद्धर्मस्यानुयायीनः आगच्छन्ति, तथाच द्वितीयवर्गे ते एव सन्ति, ये भीमरावाम्बेकडरसमाजसेवकस्य प्रभावेण बौद्धधर्मं प्रत्यागतवन्तः। एतत् तु सत्यमस्ति, यत् अस्य आन्दोलनस्य जनकः भीमरावाम्बेडकरः नास्ति, किन्तु तस्यैव प्रेरणया भारतस्य दलितवर्गस्यैकदीर्घांशः अद्य बौद्धधर्ममतावलमी अस्ति। अस्य काव्यस्यानुसारेण बाबासाहेबस्य त्रिरत्नशरणस्य (बुद्ध,धम्म एवं संघ) ग्रहणं सर्वाधिकमहत्त्वपूर्णघटनास्ति,अतः एव तु काव्यस्यान्ते कविवरः बाबासाहेबस्य जयघोषं कुर्वन् लिखति –

जय भीम महाभाग त्रिरत्नशरणंगत।
जयोऽस्तु सततं तेषां ये भवन्ति तवानंगा।।

अर्थात् त्रिरत्नशरणं प्रति गतवतः महानुभवभीमस्य जयोऽस्तु, तथाच ये भवताम् अनुगामिनः भविष्यन्ति, सदैव तेषामपि जयोऽस्तु।

उद्देश्यम्

- डॉ. भीमरावाम्बेडकरस्य विधान-सभा-कार्याणामुल्लेखनं करणीयं भविष्यति।
- दलितानामधिकारेभ्यः संघर्षस्य प्रतिपादनम्।
- शोषितमहिला तथाचापराधानां कृते कृतकार्याणां विवरणं भविष्यति।
- विविधक्षेत्रेषु सभागः तथा च स्वतन्त्र-कर्मकृतसङ्घस्य निर्माणम्।
- असमानतां विस्मृत्य राष्ट्रियेकतायाः कृते प्रयत्नोऽम्बेडकरस्य।
- स्वस्य शोधप्रबन्धं सरलभाषया लिखित्वा संस्कृतस्य महत्त्वं दर्शयितुमिच्छामि।

अहमाशां करोमि, यत् मम शोधप्रबन्धः साहित्यस्य अध्येतृणां संस्कृतजिज्ञासूनां समाजसेवकानां शोधकर्तृणां च कृते नवीनसामग्रीमुपलब्धं कारयितुं सहायकः तथा च शोधस्य कृते नूतनदिशां प्रदास्यति। इत्थं विचिन्त्य अहं स्वस्य शोधप्रबन्धस्य एतं विषयं निर्धारितवती।

सम्बन्धितसाहित्यस्य अध्ययनम्

संस्कृतं सम्पूर्णज्ञानस्य प्रमुखस्रोतः अस्ति। अतः काव्येषु तु कार्यं भवत्येव, किन्तु भीमरावाम्बेडकरस्य विषयं विचिन्त्य अनया दृष्ट्या कार्यं न प्रायः।

अतः विषयचयनात् पूर्वमेव मया स्वज्ञानाय विविधविश्वविद्यालग्रन्थालयेषु तथा च शोधगंगोत्रीशोधगंगाशोधप्रबन्धान्तर्जालमाध्यमेन च गहनान्वेषणं कृतम्, किन्तु अध्येयकाव्यान् स्वीकृत्य अनया

दृष्ट्या कार्यं मम संज्ञाने नास्ति। अतः एव “**भीमरावाम्बेडकरचरिताश्रितकाव्यनामध्ययनम्** “ इत्यस्य विषयस्य शोधकार्याय चयनं कृतं मया।

शोधदृष्टिः

अस्मिन् शोधप्रबन्धे काव्यस्वरूपस्य निर्धारणं कृत्वा प्राचीनसंस्कृतकाव्यपरम्परायाः तथा च आधुनिकसंस्कृतकाव्यपरम्परायाः निरूपणं करणीयं भविष्यति।

- आधुनिकसंस्कृतकाव्यमेवञ्च काव्यकाराणां संज्ञानं करणीयम्।
- आधुनिकसंस्कृतकाव्यानां तकनीकीदृष्ट्या तथाच व्यावहारिकदृष्ट्या व्याख्यानं करणीयम्।
- डॉ. भीमरावाम्बेकरचरिताश्रिताधुनिकाव्यानां व्याख्यानं करणीयं भविष्यति।
- संस्कृतस्य वैशिष्ट्यं दर्शयन्ती सुसरलभाषया इदं शोधकार्यं पूर्णं करिष्यामि।
- शोधकार्येऽस्मिन् शोधकार्यस्योपादेयतायाः वर्णनं भविष्यति।
- शोधकार्यस्य सहायकग्रन्थानां सूच्याः विवरणं भविष्यति।

शोधप्रविधिः

अस्मै शोधकार्याय निगमनागमनविश्लेषणव्याख्यात्मकानां प्रविधीनां प्रयोगं कृत्वा अहं स्वशोधकार्यं पूर्णं करिष्यामि, येषु अध्येयकाव्येषु **“भीमरावाम्बेडकरचरिताश्रितकाव्यानमध्ययनम्”** इत्यस्य विषयस्यविश्लेषणं भविष्यति।

शोधात् पूर्वमध्ययनम्

सामग्रीरूपेण मूलकाव्येषु ग्रन्थालयेषु च उपलब्धग्रन्थसन्दर्भग्रन्थालोचनात्मकग्रन्थविश्वकोशशब्दकोशाः तथा च पत्रपत्रिकानामध्ययनं भविष्यति। अनेन सह अन्तरजालम्-ई-लाईब्रेरी-ई-पुस्तकालय-ई-गूगल इत्यादीनां माध्यमेन प्राप्तसामग्रीणाम् अप्यध्ययनं भविष्यति।

अतः मम विश्वासः अस्ति यत् अनेन शोधकार्येण अहं **“भीमरावाम्बेडकरचरिताश्रितकाव्यानामध्ययनम्”** इत्यस्मिन् विषये सफलतापूर्वकं विचारविमर्शं कर्तुं शक्ष्यामि। आशास्ति यत् भवन्तः सर्वेऽपि विद्वांसः मह्यमस्मिन् विषये शोधपूर्णकरणाय अनुमतिं प्रदाय मम मार्गदर्शनं करिष्यन्ति।

अध्यायविभाजनम्

प्रथमोऽध्यायः – काव्यपरम्परा काव्यस्वरूपञ्च

- प्राच्यार्वाच्यमहाकाव्यपरम्परा काव्यस्वरूपञ्च
- प्राच्यार्वाच्यखण्डकाव्यपरम्परा काव्यस्वरूपञ्च

द्वितीयोऽध्यायः – अध्येयकाव्यानां काव्यकाराणाञ्च परिचयः

- अम्बेडकरदर्शनं – प्रो. बलदेवसिंहमेहराकविवरः
- भीमायनम् – प्रो. प्रभाकरशंकरजोशीकविवरः
- अम्बेडकरशतकम् – डॉ. प्रियसेनसिंहकविवरः

तृतीयोऽध्यायः – अध्येयकाव्येषु अम्बेडकरस्य जीवनदर्शनम्

चतुर्थोऽध्यायः – अध्येयकाव्यानां सांस्कृतिकपक्षात्मकमध्ययनम्

- सामाजिकस्तरे
- राजनीतिकस्तरे
- धार्मिकस्तरे
- राष्ट्रियभावना

पञ्चमोऽध्यायः – कलात्मकप्रतिबद्धताभावाभिव्यक्तिश्च

- भाषात्मकमध्ययनम्
- अलङ्कारविमर्शः
- भाव-रसश्च

निष्कर्ष-युगबोध-उपसंहारश्च

ग्रन्थसूची

क्रं.सं.	**मूलग्रन्थः**	**लेखकः / सम्पादकः**	**प्रकाशनम्**	**वर्षम् / संस्करणम्**
१.	अम्बेडकरदर्शनम्	प्रो.बलदेवसिंहमेहरा	देवेश पब्लिकेशंस्,रोहतक ६८८/१	प्रथम संस्करण, २००९
२.	भीमायनम्	प्रो.प्रभाकरशंकरजोशी	शारदा गौरव ग्रन्थमाला	नव-विक्रम २०६६
३.	अम्बेडकरशतकम्	डॉ. प्रियसेनसिहः	राष्ट्रिय संस्कृत संस्थानम् नई दिल्ली - ११००५८	संस्करण २०१२

क्रं.सं	**सहायकग्रन्थः**	**लेखकः/ सम्पादकः**	**प्रकाशनम्**	**वर्षम्/ संस्करणम्**
१.	अभिराजयशोभूषणम्	मिश्रोऽभिराज-राजेन्द्र	वैयन्तप्रकाशनम् ८ बाघम्बरीमार्गः,	प्रथम संस्करणम् जुलाई २००६ ई.
२.	काव्यादर्शः	महाकविदण्डी/ आचार्यः श्रीरामचन्द्र-मिश्रः	चौखम्बा विद्याभवन	२००९
३.	काव्यालङ्कारः	डॉ. रामनन्दशर्मा	चौखम्बा संस्कृत सीरीज वाराणसी	२०१३
४.	साहित्य दर्पण	विश्वनाथ कविराज	चौखम्बा विद्याभवन	प्रथमसंस्करण - २०१५
५.	संस्कृत वाङ्गमय का इतिहास	डॉ. जगन्नारायण पाण्डेय	आयुर्वेद संस्कृत हिन्दी जयपुर	१९९४
६.	संस्कृतसाहित्येतिहासः	आचार्यहंसराजः अग्रवालः	चौखम्बा सुरभारती	१९८६

७.	संस्कृत साहित्य का इतिहास	डॉ. रामसागर त्रिपाठी	चौखम्बा संस्कृत प्रति.दिल्ली	१९९१
८.	संस्कृत साहित्य परिचय	डॉ. राधा बल्लभ त्रिपाठी	प्रतिभा प्रकाशन २९/५ शक्तिनगर दिल्ली	१९९८
९.	नाट्यशास्त्रम्	डॉ.एच .एन. यादव	हरीशप्रकाशन मन्दिर	नवीन संस्करण
१०	और बाबासाहेब अम्बेडकर ने कहा खण्ड (०१)	एवं.जी.मेश्राम 'विमलकीर्ती'	हिन्दी अनुवादः राधा प्रकाशन प्रा.लि. नई दिल्ली - ११०००२	प्रथमसंस्करण - २००८
११.	डॉ. भीमराव अम्बेडकर	सत्यनारायण	इनडिपेंडेंपब्लिशिंगकम्पनी - ४७७४ दिल्ली -१ १०००६	१९९२
१२.	डॉ. अम्बेडकर और पं. दीनदयाल	प्रीति पांडे	एबीडी पब्लिशर्स जयपुर २०३०१५(राजस्थान)	प्रथमसंस्करण - २००६
१३.	दलित अभिव्यक्ति	रूपचन्द गौतम	श्रीनटवराजप्रकाशन दिल्ली - ११००५३	प्रथमसंस्करण - २००७
१४.	दलित - दुनिया	प्रो. कालीचरण स्नेही	नवभारतप्रकाशन डी-६२६ शीहदरा, दिल्ली - ११००९३	प्रथमसंस्करण - २००९
१५.	भीमराव अम्बेडकर	विश्व प्रकाशगुप्ता महिनी गुप्ता	राधा पब्लिकेशन्स नई-दिल्ली - ११०००२	प्रथमसंस्करण – १९९६ द्वितीयसंस्करण - २००१

क्रं.सं	कोषग्रन्थः	लेखकः/ सम्पादकः	प्रकाशनम्	वर्षम्/संस्करणम्
१.	संस्कृतशब्दार्थकौस्तुभ	पं. तारिणी सा	रामनारायण प्रयाग	१९५७
२.	संस्कृत हिन्दी कोश	वामन शिवराम आप्टे	मोतीलाल बनारसी दास दिल्ली	१९६६
३.	पारिजातकोशः	पं. ईश्वरचन्द्र	परिमल पब्लिकेशन, दिल्ली	२००४
४.	शब्दकल्पद्रुमः	राजाराधाकान्तदेवा	चौखम्बा संस्कृत सीरीज.ऑफि.	तृतीयः सं.
५.	अमरकोशः	सृजनझा	राष्ट्रीयसंस्कृतसंस्थानम्, मुम्बई	-

क्र. सं.	**पत्रपत्रिकाश्च**	**लेखकः/सम्पादकः**	**प्रकाशनम्**	**वर्षम्/ संस्करणम्**
१.	गौरव घोष	दिनेश चन्द्र जोशी	संकटमोचन आश्रम,सेक्टर-६ नईदिल्ली	मार्च-अप्रैल -२०१८